तिरुमलतिरुपतिदेवस्थानानि

# सप्तगिरिः

आध्यात्मिकसचित्रमासपत्रिका
एप्रेल् - २०२५ रू.२०/-

SAPTHAGIRI (SANSKRIT)
SPIRITUAL ILLUSTRATED MONTHLY
Volume:12 Issue: 01
April 2025, Price Rs.20/-
No. of pages-24



**तिरुमल श्रीदेवीभूदेवीसमेतमलयप्पस्वामिनः वसन्तोत्सवः**
**2025 एप्रेल् 10 तिथ्यारभ्य 12 तिथि पर्यन्तम्**



श्रीनिवासमङ्गापुरे श्रीकल्याणवेङ्कटेश्वरस्वामिने 2025 फिब्रवरि 18 तिथ्यारभ्य 26 तिथि पर्यन्तं वैभववोपेततया प्रवर्तितब्रह्मोत्सव



तिरुपति कपिलेश्वरस्वामिने 2025 फिब्रवरि 19 तिथ्यारभ्य 28 तिथि पर्यन्तं वैभवोपेततया प्रवर्तितब्रह्मोत्सव मनोहर दृश्यानि।



# गीतामृतम्

श्रीभगवानुवाच -

दूरेण ह्यवरं कर्म बुद्धियोगाद्धनञ्जय।
बुद्धौ शरणमन्विच्छ कृपणाः फलहेतवः।।
बुद्धियुक्तो जहातीह उभेसुकृत दुष्कृते।
तस्माद्योगाय युज्यस्व योगः कर्मसु कौशलम्।।

(भगवद्गीता २.४९-५०)

हे अर्जुन! चित्तशुद्धिजनकनिष्कामकर्मयोगात्, काम्यकर्म ज्ञानात् बहुदूरं भवति। दैवादपि दूरं निकृष्टं भवति। अतस्त्वं निष्कामकर्मानुष्ठानबुद्धौ स्थिरमनस्कः रक्षणं अन्विच्छ। निष्कामकर्मयोगमेव शरणमाश्रय। फलापेक्षया कर्मकारिणः नीचाः। फलाशावन्तः दैवदूराः दैवज्ञानसंघदूराश्च।

चित्तशुद्धियुक्तः समत्वबुद्धिमान् पुण्यपापे अस्मिन्नेव लोके जीवन्नेव विसर्जयति। पुण्यपापातीतो भवति। तस्माद्योगाय सन्नद्धो भव। कर्मसु नैपुण्यमेव योगः इत्युच्यते। पुण्यपापजसुखदुःखफले अपतनमेव कर्मकौशलम्। दैवज्ञानी कर्मसु निर्लिप्तो भवति।

# सङ्कीर्तनम्

नमो नमो दशरथ नन्दन राम
कमनीय यागभागकर्ता राम
काकुत्सकुल राम कौसल्यासुत राम
श्रीकरगुणोन्नत श्रीराम
काकात्स्थसुरवैरि राम कौशिकवत्सलराम
भीकरताटकान्तकबिरुद राम
वारिधिबन्धनराम वालिहरणराम
चारुहरकोदण्डभञ्जन राम
धरणीजपति राम दशकण्ठहर राम
सारविभीषणभिषेचन राम
अमरपालित राम अयोध्यापति राम
समरकोविद राम सर्वज्ञ राम
विमलरामश्रीवेङ्कटगिरि राम
रमण, शरणागतरक्षक राम।



(अन्नमाचार्य
आध्यात्मक
सङ्कीर्तना)



सम्पादकीयम्

# श्रीरामरक्षणम् सर्वजगद्रक्षणम्

कुटुम्बे व्यक्तेः आदर्शप्रायत्वंचेत् कुटुम्बः सर्वोऽपि आदर्शप्रायस्स्यात्। व्यक्तेः आदर्शप्रायत्वे श्रीरामेण विना अन्यदुदाहरणं नास्ति। अस्मिन्नाधुनिकयुगे यद्यपि बहवः रामायणपारायणं कुर्वन्ति तदर्थं परमार्थं वा न गृह्णन्ति। रामायणे सर्वत्र एकसतीत्वं सत्यपालने एकवाक्यत्वं, शत्रुसंहरणे एकबाणत्वं इति श्रीरामस्य नियमाः, स्वेहानुरक्तिः, प्रतिज्ञापालनं, शिष्टरक्षणं, औदार्यं, सीतापातिव्रत्यं, क्षमा, आदर्शधर्मनिर्वहणं पुत्रवात्सल्यं, दशरथपुत्रप्रेम, भरतादीनां सोदरप्रेम, लक्ष्मणसेवा, रामकार्यदुरन्धरत्वं, हनुमत्स्वामिभक्तिः सययज्ञता, अकुण्ठितब्रह्मचर्याव्रतम्, भक्तेभ्यः अभयप्रदातृत्वं, एते सर्वे गुणाः रामायणपवित्रतायाः प्रचाराय च उपकुर्वन्ति।

स्वकीयत्वेन, स्वेषु विद्यमानत्वेन, आत्मवत्कष्टसुखानुभवत्वाद्रामे, रामः सर्वाभीष्टः जातः। कामान्धस्य मरणशिक्षैव इति धर्मसूक्ष्मं वालिने श्रीरामः उपदिदेश। वालिः सनातनधर्मं परित्यज्य सोदरसुग्रीवस्य भार्यां रुमां बलात्कृत्य कामपरवशः पापमाचचार। अत एव वालिनः श्रीरामः मरणशिक्षां ददौ। एवं सीतापहरणदोषात् रावणोऽपि मरणशिक्षामवाप। कैकीयीवांच्छामनुसृत्य पितृवाक्यपालनार्थं पट्टाभिषेकं परित्यज्य अटवीं गत्वा मातृदेवो भव, पितृदेवोभव इति वेदोपनिषद्वाचां भाष्यं बभूव। सहधर्मचारिण्यां जानक्यामेव पवित्रदृष्टिमान् सन् अन्यस्त्रीषु वात्सल्यभक्तिप्रेमवानासीत्। शत्रुवर्गस्थे विभीषणे शरणागते सति अवरोधामनस्कः स्वाश्रयं ददौ। एकपत्नीव्रतशरणागतरक्षणकार्यद्वयं दृढदीक्षया आचरन् दृढव्रतः इति कल्याणचक्रवर्ती अयोध्यारामः प्रशस्तिमवाप।

सोदरैः परस्परप्रवर्तनं, केन प्रवर्तनेन सत्फलितं स्यादिति रामलक्ष्मणभरतशत्रुघ्नानुदाहृत्य, कथं न प्रवर्तितव्यमिति वालिसुग्रीवौ, रावणकुम्भकर्णौ दृष्टान्ततया प्रदर्शयत् नित्यजागृतं श्रीमद्रामायणमहाकाव्यं करोति।

रामायणे श्रीरामः धार्मिकशक्तिं जीवन्मुक्तिमार्गं प्राप्तुं सुलभोपायं दर्शयामास। अज्ञात्वा कृतदोषः दोषः न भवतीति, दोषः प्रायश्चित्तानुभवात् पापफलदः न स्यादिति भस्मरूपावस्थां स्त्रियं पवित्राश्चकार। गुहस्य भक्तिं ज्ञात्वा समताभावेन आलिङ्गनसौख्यं ददौ। गिरिजनजातिस्त्रिया शबर्या प्रेम्णा दत्तानि उच्छिष्टफलानि स्वीकृत्य आस्वाद्य निष्कल्मषभावनां प्रदर्श्य आगामिलोकस्य तरतमतारतम्यभेदः न प्रदर्शनीयः इति परमादर्शशीलत्वं प्रदर्शयामास।

जटायुशबरीविभीषणसुग्रीववानरकाकासुरजन्तुपशुपक्षिषु प्रेमभावं प्रदर्श्य सर्वभूतहितः इति कीर्तिमवाप। वाग्दानमनुसृत्य वालिं हत्वा सुग्रीवाय राज्यं तस्य भार्याश्च समर्प्य सत्यवाक्पालकः इति निरूपयामास। श्रीरामः न केवलं भगवानिति, पूजानिर्वहणं, नित्यजीविते सर्वेभ्यः आदर्शप्रायः इति भावनया जीवनयात्रागमनं कृतश्चेत् सर्वेपि भगवत्स्वरूपाः, प्रपञ्च एव पावनायोध्यानगरी स्यात्। तदा सर्वेपि धर्म परिरक्षकाः भविष्यन्ति इति कथने नकोपि संशयः। इदमेव परमसत्यम्।

श्रीरामचन्द्रश्रितपारिजातः समस्तकल्याणगुणाभिरामः
सीतामुखाम्भोरुहचञ्चरीको निरन्तरं मङ्गलमातनोतु।।

# एप्रिल् -२०२५

सम्पुटिः-१२ सञ्चिका-०१

स्वस्तिश्री चान्द्रमानश्रीविश्वासुनामसंवत्सर चैत्रशुद्धतृतीयातिथि मङ्गलवारादारभ्य - वैशाखशुद्धतृतीयातिथि बुधवारपर्यन्तम् - २०२५

ओण्टिमिट्टकोदण्डरामस्वामिदेवालयः 06
- डा के.कोटेश्वरय्य

श्रीरामनवमीव्रतम् 09
- डा पि.माधवी

महाकुम्भमेलनविशेषाः 11
- डा सि.रामलक्ष्मी

भृगुमहर्षिः 16
- आचार्य जि.पद्मनाभम्

परोपकारार्थमिदं शरीरम्, निष्कलङ्कभक्त्यामुक्तिः 19
- डा एम्.ईश्वरम्म

सुगुणभिरामः रामः (चित्रकथा) 20
- डा.के.सूर्यनारायणरेड्डि

बालविनोदिनी 22

मुखचित्रम् - तिरुमल श्रीदेवीभूदेवीसमेतमलयप्पस्वामिनः वसन्तोत्सवः।

अन्तिमपुटः- श्रीसीतालक्ष्मणसमेत श्रीपट्टाभिरामस्वामिनः वायल्पाडु।

## सङ्केतः

प्रधानसम्पादकः,
सप्तगिरिः, ति.ति.देवस्थानानि
तिरुपतिः - ५१७ ५०७.

दूरभाषा - ०८७७ - २२६४५४३, २२६४३५९
सम्पादकः,
०८७७ - २२६४३६०

सूचनानाम्, आक्षेपाणां च कृते
सम्पर्कं कुर्वन्तु -

sapthagiri.helpdesk@tirumala.org

एका पत्रिका : रू.२०/-
वार्षिकग्राहकत्वम् रू.२४०/-
आजीविक ग्राहकत्वम् रू.२४००/-

अधमांस्तु न सेवेत य इच्छेत् भूतिमात्मनः।

*वेङ्कटाद्रिसमं स्थानं*
*ब्रह्माण्डे नास्ति किञ्चन।*
*वेङ्कटेशसमो देवो*
*न भूतो न भविष्यति ॥*

तिरुमलतिरुपतिदेवस्थानम्

# सप्तगिरिः

आध्यात्मिकसचित्रमासपत्रिका

गौरवसम्पादकः-
श्री जे.श्यामला राव्, I.A.S.,
कार्यनिर्वहणाधिकारी, ति.ति.देवस्थानानि।

प्रकाशकः -
प्रधानसम्पादकः
डा॥के.राधारमणः,
M.A., M.Phil., Ph.D.,P.G.Dip.in Epigraphy, Dip. in Yoga

सम्पादकः -
डा॥ वि.जि.चोक्कलिङ्गम्, M.A., Ph.D.,

मुद्रापकः -
श्री पि.रामराजु, M.A.,
प्रत्येकाधिकारी, ति.ति.दे.मुद्रणालयः, तिरुपतिः।

मुख्यछायाचित्रग्राहकः -
श्री पि.एन्.शेखरः,
छायाचित्रग्राहकः, ति.ति.दे.
श्री बि.वेङ्कटरमणः, सहायक-छायाचित्रग्राहकः, ति.ति.दे.



सूचना
मुद्रितलेखानां विचाराः लेखकानामेव।
एतद्विषये अस्माकं दायित्वं नास्ति।
— *प्रधानसम्पादकः*



# ओण्टिमिट्टकोदण्डरामस्वामिदेवालयः

- डा.के.कोटेश्वररय्य, चरवाणी - ९९८५१२३२६२

भारतदेशे प्रसिद्धदेवालयेषु श्रीमदोण्टिमिट्ट-कोदण्डरामालयः एकः। अरण्यवासे सीतालक्ष्मणसमेतस्य श्रीरामस्य दिनत्रयपर्यन्तं उन्नतपर्वतप्रदेशनिवासप्रदेशत्वात् तत्रैव निर्मितदेवालयत्वात् आलयगोपुराणि सुदूरदृष्टाण्यपि सम्यक् नयनगोचरणानि भवन्ति। अयमुन्नतप्रदेशः एव एक श्रुङ्गशैलः इति व्यवहृतः। एतद्देवालयमूलविराड्विग्रहं जाम्बवान् प्रतिष्ठापयामास। मूलविराड्विग्रहे सीतारामलक्ष्मणाः एकशिलायामेव, मनोहरतया दृश्यन्ते। अत्र आञ्जनेय स्वामिविग्रहः नास्ति। श्रीरामस्य वनवासे ओण्टिमिट्टप्रान्तसञ्चारकाले श्रीरामस्य आञ्जनेयपरिचयः सीतारामलक्ष्मणयोः नाभूत्।

**आलयनिर्माणशैली वैशिष्टच्यम् : -** अयमालयः द्राविडनिर्माणशैल्यां दृश्यमानः विजयनगरराजपालनकाल -निर्माणशैल्याः दर्पणमिवराजते। एतदालयनिर्माणं १३५० प्रान्ते बुक्करायकाले प्रारब्धः। पश्चात् क्री.१५९०-१६२८ मध्यकाले रङ्गमण्टपमहाप्राकारप्रागुत्तरदक्षिणदिक्सु गोपुराणि निर्मितानि। विजयनगर चक्रवर्तिणामादेशानुसारं सिद्धवटकेन्द्रत्वेनपालितसामन्तभूपाल मट्लिराजपर्यवेक्षणे आलयनिर्माणं अभिवृद्धम्। ततः प्राग्गोपुरैः महाप्राकारश्चनिर्मितः। पश्चात् तिरुवेङ्गनाथ तत्पौत्रानन्तराज समये उदीचि दक्षिणगोपुरनिर्माणं परिपूर्णम्। गोपुराणि चोळ पद्धत्यां निर्मितानि। त्रिदशासु चोलविजयनगरमट्लिराजभिः आलयः अभिवृद्दः। षट्शताब्दचरित्रविशिष्टोऽयं देवालयः बहुपालकाभिवृद्धिकृषिफलितः।

**जाम्बवद्विग्रहप्रतिष्ठा -** कोदण्डरामालये उन्नतपर्वतमहाप्राकार मध्यभागे गर्भदेवालये मूलविराड्विग्रहाः जाम्बवता



अनुकूलकलत्रस्य स्वर्गस्तस्य न संशयः।

प्रतिष्ठापिताः। अत्र दक्षिणहस्ते बाणं वामहस्ते कोदण्डं शिरसि किरीटं धृत्वा राक्षससंहारार्थं तिष्ठन् श्रीरामः दृश्यते। वामहृदयभागे सीतादेवी। दक्षिणभागे लक्ष्मणः अङ्गरक्षक धनुर्धारीव तिष्ठन् दृश्यते। श्रीरामः मन्दस्मितवदनारविन्देन शोभायमानः भक्तेभ्यः आशीः प्रदातेव दिव्यमङ्गल मूर्त्या दृश्यते। एकशिलायां सीतारामलक्ष्मणदेवतामूर्तिनिर्माणात् एकशिलानगरमिति ओण्टिमिट्टस्य अन्यन्नाम।

आलयगोपुराणि आलयार्थं निर्मिते महाप्राकारकुड्ये त्रीणि गोपुराणि द्वाराणि च सन्ति। विशालावरणे प्राग्दिक् प्राकारमध्यभागे, अत्युन्नतप्रधानगोपुरं, पञ्चगोपुरद्वाराणि पश्यतां नेत्रपर्वतया वर्तन्ते। प्राग्द्वारं महाद्वारमिति वदन्ति। महाद्वारशिल्पकला बाह्यान्तरेषु अत्यद्भुतं दृश्यते। द्वारनिर्मित शिलास्तम्भे अप्सरसां नाट्यभङ्गिमा, क्षीरसागरमथनं, सीतापरिणयशिरोविकिरत्तण्डुल दृश्यं, एक शिलायामेव गौः हस्ती, कृष्णशिल्पम्, अश्वादीनां शिल्पं सुमनोहरं भवति। आलयमुखद्वारौन्नत्यं १६० पादाः। प्राग्दिशि आरोहणाय सोपानपंक्तिः दृश्यते। उत्तरदक्षिणदिशोः गोपुरद्वारद्वयं वर्तते। प्रग्गोपुरादेते न्यूनौन्नत्यतया दृश्यते। दक्षिणगोपुरादपि भक्तैः आलयप्रवेशः कर्तुं शक्यते। विशेषदिनेषु उत्तर गोपुरद्वारमुद्घाट्यते।

**प्राधानालयः** - ध्वजस्तम्भस्य पुरतः रङ्गमण्टप मुखमण्टप अन्तराळगर्भालयस्थमूलविराङ्गिशिष्टनिर्मित प्रदेशः एव प्रधानालयः।

**रङ्गमण्टपाद्भुतकलावैभवम्** - देवालये अयं मण्टपः गर्भालयाभिमुखतया द्वात्रिंशत् शिलास्तम्भैः विराजते। अत्र विजयनगरशैल्यां विद्यामानं शिल्पकला नैपुण्यं स्तम्भे स्तम्भे सर्वान् आश्चर्यमग्नान् करोति। एतत्सैन्यर्यं हम्पीदेवालयमण्टपान् स्मारयति। अत्र चोलविजयनगरवास्तुशैलीविशिष्टरामायणभागवतकथा चित्रणि स्तम्भेषु पश्यामः। कोदण्डरामालये मध्यमण्टपे द्वादशस्तम्भेषु अश्वशरीराकृतयः दृश्यन्ते। दशावतारशिल्पानि शिल्पीनां प्रतिभानैपुण्यं द्योतयन्ति। स्तम्भेषु पुराणभागवतरामायणसम्बन्धिवृत्तान्ताःअतिमनोहराः भवन्ति। वारधिनिर्माणं पूतनासंहारः हनुमता शिलानयनचित्रं, लक्ष्मणमूर्चा, घृतेन कृष्णः, वेणुगोपाल स्वामी, काळीयमर्दन दृश्यं, कृष्णगोवर्धनगिर्युद्धरणदृश्यं हिरण्यकशिपुं संहरन्नसिंहस्वामि हनुमत्कोदण्डरामशिल्पदृश्यानि वर्णनातीतानि। पुरा रङ्गनायकमण्टपे नृत्यसङ्गीतवाद्यगानैः भक्ताः स्वामिनं सेवन्ते स्म। नटीमणयः रघुनायकाष्टक मङ्गलहारतिभिः नृत्यं कुर्वन्तः स्वामिनमाराधयन्ति स्म।

**गरुडाल्वारुसन्निधिः** - गर्भालयाभिमुखतया, मुखमण्टपे मनोज्ञ शिल्पकळाशोभित गरुडाल्वारुसन्निधिः वर्तते। चतुःकुड्यैः स्वल्पगोपुरेण स्वल्पदेवालयः इव वर्तते।

**ध्वजस्तम्भः** - प्रङ्मुखद्वारपुरतः बलिपीठसमीपे लोहफलकावृतः स्वर्णलेपविशिष्टः ध्वजस्तम्भः वर्तते।

**शासनानिः** - आलये प्राग्द्वारपार्श्वतः १३५६ संवत्सरे आन्ध्रभाषायां लिखित शिलाशासने वर्तेते। तत्र आलयनिर्माण विशेषाः वर्तन्ते।

**महाप्राकारदेवालयमध्यनिर्माणानि** - देवालयप्रकारमध्ये विशालप्रदक्षिणपथं वर्तते। देवालयाग्नेयभागे नित्यनैवेद्याप्रसादनिर्माणाय "पोटु" यागशाला, वायव्ये श्रीरामस्य एदुर्कोलुमण्टपः (स्वागतमण्टपः) निरुतिदिशि कल्याणमण्टपाः सुसम्यक् निर्मिताः। पूर्वं सीतारामकल्याणं निरुतिदिक्स्थ कल्याण मण्टपे निर्वहन्ति स्म। अद्य देवालयस्य एक कि मी दूरे पश्चिमदिशि कडपपट्टणगमनमुख्यमार्ग समीपे तिरुमलतिरुपतिदेवस्थानाध्वर्ये निर्मिते कल्याणमण्टपे कल्याणमहोत्सवं वैभवोपेततया निर्वहन्ति। दक्षिणगोपुरात् पश्चिमदिशि उत्तरगोपुरसमीपे यात्रिकेब्यः निवासगृहाणि निर्मितानि। १६५० वर्षे फ्रेंचिदेश यात्रिकः वज्रव्यापारी जीन्बास्टिस्ट् टावेर्नियरु भारतदेशाद्भुतालयेषु ओण्टिमिट्ट देवालयः एकः इत्यभिवर्णितवान्। विजयनगरराजकालात् ओण्टिमिट्टस्य बहुलप्राचुर्यं वर्तते। अरवीटिराजभिः स्वामिनः मान्यानि दत्तानि। बिटिष् प्रभुत्वपालने थामसमन्रोत्कर्नल् - कोलिन्मेकंजीमहोदयाभ्यां आलयस्य आर्थिकसाहाय्यमपि दत्तम्। १८६३-१९३६ वर्षवासी आन्ध्रवाल्मीकि विदाङ्कितः स्वामिनः आभरणानि दत्वा रामसेवाकुटीरमपिनिर्ममे। आलयमण्टपे शिथिलस्तम्भानां स्थाने आयस-स्तम्भान्, आयस रक्षणानि (परिघ) च बद्ध्वा गोपुरसंरक्षणं चकार। अनेनैव गोपुरभागाः पुनरुदृधृताः। द्वारकवाटनूतन रथनिर्माण रथशालाननीनीकरणादि कार्याणि कृत्वा महात्यागशीलीति सर्वैः प्रस्तुतः स्वयावत्सम्पदं देवालयायैव अङ्कितश्चकार। पुरावस्तुशाखा देवालयमिमं स्वादीनीकृत्य गोपुर प्राकारान् अन्तस्थभागान् रसायनिकपदार्थैः शुद्धिश्चकार। २००० वर्षपर्यन्तं स्थानिकैः पवित्रभावनया दैवसन्निधौ रङ्गमण्टपे कल्याणानि निर्वहन्ति स्म।

**सञ्जीवरायदेवालयः** - कोदण्डरामालयस्य पुरतः प्राग्दिशि सञ्जीव रायदेवालयः वर्तते। ९ पादौन्नत्ये श्रीकोदण्डरामस्वामिने अञ्जलिसमर्पणरूपे क्षेत्रापालकत्वेन विग्रहमूर्तिः दृश्यते। रामावतारसमाप्तौ सदा दर्शनभाग्यकामिनः आञ्जनेयाय अनुग्रहेण दत्तोऽयमवकाशः इति पुरणगाथा वर्तते। संजीवराय

देवालयः क्रि-श १४०० सवत्सरे निर्मितः इति चारित्रकाभिप्रायः।

**रथशाला-** रथम् - पर्वदिनेषु, ब्रह्मोत्सवेषु श्रीकोदण्डरामस्वामिने परिभ्रमणोत्सवाय निर्मितं रथं महासौन्दर्योपेतं दृश्यते। मट्लिराजकाले रथं रथशाला च निर्मिता। वाविकोलनुसुब्बारावु महोदयैः पुनरूद्धृता।

**रामतीर्थम् -** अरण्यवासे सीतादाहनिवारणार्थं श्रीरामेण बाणेन जलमानीतमिति एतज्जलं मधुरातिमधुरं व्याधिनाशकं अमृतोपमानमिति वदन्ति। ओण्टडुमिट्टडु द्वौ सोदरौ एतज्जलेनराज्ञः कम्परायस्यदाहार्तिं निवारयामासतुः। अत एव तदभीष्ठानुसरमत्र जलाशयोऽपि निर्मितः इति अत्र जलं सर्वदा लभ्यते इति वदन्ति। वाविकोलनुसुब्बारावुमहोदयः जलाशयावतरणाय सोपानपंक्तिमपि निर्ममे इति वदन्ति।

**लक्ष्मणतीर्थम् -** ओण्टिमिट्टजलाशयाधः स्थले रामतीर्थस्य समीपे लक्ष्मणतीर्थमपि मधुरजलप्रदं वर्तते। लक्ष्मणबाणेन अत्र पातालाज्जलमागतमिति पुराणगाथा।

**मृकण्ड्वाश्रमः -** कोदण्डरामालयस्य एक कि-मी दूरे पश्चिमदिशि मृकण्डाश्रमः वर्तते। मृकण्डुः अत्रैव ईश्वरमुद्दिश्य तपश्चकार। अस्य पुत्रः अत्रैव मार्कण्डेयः शिवानुग्रहात् मृत्युञ्जयः बभूव। अरण्यवासे रामलक्ष्मणाभ्यां मृकण्ड्वाश्रम परिसरप्रवर्तित यज्ञयागान् संरक्षितवन्तौ। वर्षे वर्षे कार्तिकमासे भक्ताः अत्र आगत्य पूजाः आचरन्ति।

**श्रृङ्गिशैलम् -** ओण्टिमिट्टजलाशय पुरतः रामतीर्थस्य पाश्वे विद्यमानाल्पपरिमाण पर्वतः एव श्रृङ्गिशैलमिति व्यवहरन्ति। निष्कारणतया परीक्षिन्महाराजे शापप्रदानात् पश्चात्तप्तः श्रृङ्गिमुनिः अस्मिन् पर्वते एव तपश्चकारेति वदन्ति।

**भक्तपोतनोद्यानवनम् :** - कोदण्डरामालय दक्षिण दिशि तिरुपतिगमनमार्गे पोतनोद्यानवने २००२ वर्षे पोतन विग्रहः प्रतिष्ठितः।

**ओण्टिमिट्टकोदण्डरामालयः मतसामरस्यप्रतीकः -** अत्र भक्तिभावेन महम्मदीयः इमांबेगूं हेराम'' इति रामं आह्वयामास। झटित्येव ओं इति प्रत्युत्तरमागतमिति कृतज्ञतापूर्वकतया देवालयाग्नेयभागे कूपं खनित्वा देवालयस्य पूजाकार्यक्रममविनियोगाय उपकृतवान्। पूर्वकालादारभ्य अनेके महम्मदीयाः भक्त्या श्रीराम दर्शनभाग्यं प्राप्नुवन्ति। गोल्कोण्डनवाबुमहाशयस्य श्रीरामस्य स्वप्नदर्शनं, रामभक्तेषु कबीरमहाशयस्य प्रामुख्यं एव मतसामरस्योदन्ताः बहवस्सन्ति।

**ब्रह्मोत्सवाः -** वर्षे वर्षे चैत्रमासे शुद्धनवम्यारभ्य बहुलद्वितीयदिनपर्यन्तं ब्रह्मोत्सवाः निर्वाह्यन्ते। सीतारामकल्याणं शुद्ध चतुर्दशीतिथौ अङ्गरङ्गवैभवोपेततया निर्वहन्ति। अन्यत्र देवालयेषु दिवैव नवम्यामेव कल्याणानि निर्वहन्ति। चन्द्रः दिवा न दृश्यते इति चन्द्राभीष्टसिद्ध्यर्थं रामेण रात्रौ शुद्धचतुर्दश्यां कल्याणनिर्वहणानुमतिः चन्द्राय दत्तेति पुराणगाथा। तस्मिन्दिने लक्षाधिकभक्तजनाः कल्याणदर्शनार्थमागच्छन्ति। देवस्थानाधिकारिभिः, स्वच्छन्दसंस्थाभिश्च जलभोजन वसतिसौकर्यादीनि कल्पितानि। आन्ध्रप्रदेशप्रभुत्वेन प्रप्रथमतया २०१५ वर्षे सीतारामकल्याणं प्रवर्तितम्। तिरुमल तिरुपति देवस्थानाध्वर्ये २०१६ वर्षात् सीतारामकल्यण ब्रह्मोत्सवाः अङ्गरङ्गवैभवोपेततया निर्वाह्यन्ते। कल्याणमण्टपं सुविशालप्रदेशे निर्मीय पुष्करिणीं नक्षत्रवनसौकर्यञ्च ति.ति.देवस्थानं कल्पयामास। देवालयनिर्वहणार्थं शतकोटिरुप्यकाणिव्ययं कृत्वा अभिवृद्धिकार्यक्रमान् निर्वहन्ति। ''श्रीरामचन्द्रः श्रितपारिजातः समस्तकल्याणगुणाभिरामः, सीतामुखाम्भोरुहचञ्चरीको निरन्तरं मङ्गलमातनोतु।'' भारतदेशे रामालयरहितपट्टणं यत्रकुत्रापि न स्यात्। बहुषु ग्रामेषु च रामालयास्सन्ति। ''परित्राणाय साधूनां विनाशाय च दुष्कृतां। धर्मसंस्थापनार्थाय सम्भवामि युगे युगे।'' इति श्रीकृष्णपरमात्मना प्रोक्तरीत्या भगवान् विष्णुः दुष्टरावणसंहारार्थं देवता प्रार्थनया त्रेतायुगे दशरथपुत्रत्वेन लक्ष्मण भरतशतृघ्नैः सह जातः धर्मस्वरूपः पितृभक्तः उत्तमसोदरः, उत्तमपतिः उत्तमराज्यपालकः उत्तममातृपितृभक्तियुतः उत्तमोत्तमाश्रितरक्षकः जगदादर्शकः सन् सर्वपूज्यः भवति। अत एव रामोविग्रहनात् धर्मः इति ख्यातः। ''यावत्स्यास्यन्ति गिरयः सरितश्च महीतले। तावद्रामायण कथा लोकेषु प्रचलिष्यति।'' इत्युक्तं सर्वधा सत्यमेव। शिवोऽपि पार्वतीमुद्दिश्य -

**श्रीरामरामेति रमे रामे मनोरमे।**
**सहस्रनाम तत्तुल्यं राम नाम वरानने।।** इति

रामनाममहात्म्यं विशदीचकार। श्रीरामकाले चतुष्पादैः धर्मदेवता चलतिस्म। श्रीरामः ११०००० वर्ष पर्यन्तं राज्यं पालयित्वा धर्मसंस्थापनकार्यं पूरयित्वा स्वधाम वैकुण्ठं जगाम। युगेषु गतेष्वपि भक्ताः रामालयं गत्वा रामदर्शनं प्राप्य रामनामस्मरणात् पापविमुक्ताः भवन्ति। भारतेसर्वत्र रामालयेषु नित्यपूजाः प्रवर्तन्ते। रामजन्मस्थले अयोध्यायां प्रस्तुतकेन्द्रप्रभुत्वेन सुविशालप्रदेशे रामालयः निर्मितः सर्वजनसम्पूज्यः भारतदेशायैव अलङ्कारप्रायः भवति।

**श्रीराघवं दशरथात्मजमप्रमेयं**
**सीतापतिं रविकुलान्वय रत्नदीपं।**
**आजानुबाहुमरविन्ददलायताक्षं**
**रामं निशाचरविनाशकरं नमामि।।**

# श्रीरामनवमीव्रतम्

- डा.पि.माधवी
चरवाणी - ८५१९८०४७८४



चैत्रशुक्लनवम्यां पुनर्वसुनक्षत्रे चतुर्थपादे मध्याह्ने कर्काटकलग्ने सूर्ये मेषराशौ स्थिते पञ्चग्रहेषु उच्चस्थाने स्थितेषु श्रीरामचन्द्रः विष्णोः दशावतारेषु रामावतारत्वेन कौसल्यागर्भात् सञ्जातः। अस्मिन् वर्षे एप्रेल् मासे षष्ठदिनाङ्के श्रीरामनवमीपर्वदिनमिति ति.ति.दे. कालनिर्णयपट्टिकायां ज्योतिष्कैः निर्दिष्टम्।

**व्रतविधानम् -** आष्टम्यां पुरोहितः पूजनीयः। पुरोहितः श्रीरामः इति भावनीयः। श्रीरामप्रतिमादानं करिष्येहं द्विजोत्तम। इश्वाकुवंशतिलक प्रीतोभव भवप्रिय! नवम्यङ्गभूतेन एक भुक्तेन राघव। इश्वाकुवंशतिलक प्रीतोभव भवप्रिय। इत्युक्त्वा नैवेद्यपदार्थाः हविष्यादयः भोज्याः। पूजामण्टपं निर्मीय नवम्यां प्रातःकाले

उपोष्यते नवमीत्वद्य यामष्वष्टसु राघव।
तेन प्रीतोभव त्वं मे सांसारात्राहि मां हरे
इमां स्वर्णमयी प्रतिमां त्वां प्रयन्नतः
श्रीमत्प्रीतये दास्ये रामभक्तायधीमते।

इत्युक्त्वा श्रीरामनवमीव्रताङ्गभूतषोडशोपचारपूजां करिष्ये इति संकल्पः कर्तव्यः।
मण्टपे कलशं संस्थाप्य वस्त्रसहित -
पूर्णपात्रे अग्न्युत्तारणादिविधिना
श्रीरामं प्रतिष्ठाप्य पुरुषसूक्तेन
षोडशोपचारपूजां कृत्वा पूजान्ते

रामस्य जननी चापि रामात्मकमिंद जगत्।
अतस्त्वां पूजयिष्यामि लोकमातः नमोऽस्तु ते।।

इत्युक्त्वा कौसल्यां संप्रार्थ्य ओं
नमो दशरथाय इति दशरथं
पूजयित्वा पूजां समाप्य
मध्याह्ने फलपुष्पजलपूर्णशङ्खेन अर्घ्यं देयम्।

दशाननवधार्थाय धर्मसंस्थापनाय च।
दानवानां विनाशाय दैत्यानां निधनाय च।।
परित्राणाय साधूनां जातोरामः स्वयं हरिः।
गृहाणार्घ्यं मया दत्तं भ्रातृभिस्सहितोऽनघ।।

इत्युक्त्वा जागरणं कृत्वा प्रातःकाले नित्यपूजां कृत्वा मूलमन्त्रेण शतवारं होमं कृत्वा पूजान्ते आचार्याय (पुरोहिताय) प्रतिमादानं कर्तव्यम्। इमां स्वर्णमयीं राम। प्रतिमां समलङ्कृतां

शुचिवस्त्रयुगछन्नां राम अहं राघवाय श्रीरामप्रीतये दास्ये तुष्टो भवतु ते राघव। तव प्रसादं स्वीकृत्य क्रियते पारणा मया। व्रतेनानेन सन्तुष्टः स्वामिन् भक्तिं प्रयच्छ मे।।

इति प्रार्थयित्वा नवम्यन्ते पारणं कर्तव्यम्। श्रीरामनवम्यां बुद्धिपूर्वकं उपवासाचरणानासक्ताः घोरकुम्भीपाके पतिष्यति। सर्वैरप्याचरणीयमिदं श्रीरामव्रतम्। दानप्रतिमायां द्विभुजः सीतासहितरामः दक्षिणहस्ते ज्ञानमुद्राविशिष्टः भवितव्यः।

**गर्भनवरात्रयः -** भक्ताः इदं पर्व युगादिप्रतिपत्तिप्रथमदिनादारभ्य श्रीरामनवमीपर्यन्तं रामायण पारायणादि पुण्यकार्याणि कुर्वन्ति। अत एत गर्भनवरात्रयः इति उच्यन्ते। वसन्तपूजाः अपिनवरात्रिपर्यन्तं क्रियन्ते। कुत्रचित् राममन्दिरेषु रामलीलाभिनयमपि कुर्वन्ति। अस्मिन् पर्वणि स्नाननूतनवस्त्रधारणमतीव मुख्यम्। महाराष्ट्रे उदये नवमघण्टासमयात् द्वादशघण्टापर्यन्तं देवालयेषु

रामजन्महेतुकथां गायन्ति। नवमीरात्रौ जागरणेन रामपूजां कुर्वन्तः व्रताङ्गपूजायाः उद्वासनं कुर्वन्ति।

आन्ध्रदेशे नवम्यां सीतारामकल्याणनिर्वहणमाचारः। तेलङ्गाणप्रान्ते भद्राचले श्रीरामकल्याणं निर्वहन्ति। अद्य ति.ति.देवस्थानं वै.यस्.आर्. जिल्लायां ओन्टिमिट्टे श्रीरामालये सीतारामकल्याणं महावैभवोपेततया निर्वहति। सहस्राधिकाः जनाः दर्शनार्थमागच्छन्ति। सीतारामकल्याणतण्डुलानि स्वीकृत्य स्वशिरसि विकिरन्ति। श्रीरामवनवासगाथा आन्ध्रभूमावेवप्रचलिता। कृष्णादपि श्रीरामप्राभावः आन्ध्रे अधिकः इति वदन्ति। आन्ध्रेषु भक्तरामदासप्रभावः अत्यधिकः। नवम्यां गुडपानकं परस्परं अन्यद्रव्येणपदार्थैः साकं ददति। रामः आन्ध्रदौहित्रः इति राम वनवासे अधिक भागं मातृदेशाटव्यां यापयामोसेति वदन्ति।

रामजननं पुरस्कृत्य अयोध्यायां वैभवोपेततया उत्सवं निर्वहन्ति। श्रीकृष्णः जगद्गुरुः, श्रीरामः जगन्नाथः रावणसंहारार्थमवततार।

वैवस्वतमन्वत्तरे पञ्चमत्रेतायुगे चतुर्थ भागे पञ्चत्रिंशत्समान विलम्बिनाम संवत्सरे चैत्रशुद्धनवमीबुधवासरे जातः रामः। बहुमन्वन्तरेषु गतेष्वपि अद्यापि भारते वैष्णवदेवालयेषु गतेष्वपि श्रीरामनवम्युत्सवाः रामनामसप्ताह - एकाहादीनि वर्षे वर्षे माहानन्ददायकतया प्रवर्तन्ते। आदर्श पुरुषः श्रीरामः महाभारत युद्धकालादति प्राचीनः। मनुचक्रवर्तिवंशावल्यां पञ्चषष्ठिपुरुषः। क्रिस्तुपूर्वं २०५५ संवत्सरे श्रीरामजननकालः इति श्री यल्डि स्वामिकन् - आरुसम्पत्कुमारमहाशययोः वादः। भारतकालमानमनुसृत्य वैवस्वतमन्वन्तर पञ्चमत्रेतायुगे चतुर्थभागे ८०००० संवत्सर विलम्बिचैत्रशुद्ध बुधवासरे श्रीरामजन्मेति श्रीमन् कोयिकन्दडै वेङ्कटसुन्दराचार्य स्वामि मतम् समीचीनमिव भाति। ऋग्वेदे ९३.१४ मन्त्रे श्रीरामचन्द्र पवित्र नाम, शतपथब्राह्मणे सोदर भरतस्य गाथा वर्तते। तैत्तरीयप्रातिशाख्ये वाल्मीकिमहर्षिनामवर्तते इति वेबरु पाश्चात्यचरित्रकारः स्वपरिशोधने प्रोवाच। श्रीमद्रामायणे

(अनुवर्तते१५)





अपि धन्वन्तरिः वैद्यः किं करोति गतायुषः।

# महाकुम्भमेळनविशेषाः

तेलुगुमूलम् - मैलवरपु ललिता कुमारी
संस्कृतानुवादः - डा.सि. रामलक्ष्मी



माघमासे निर्वाह्यमानं कुम्भमेळनं प्रपञ्चे एव अतिमहानाध्यात्मिक सङ्गमः। विशिष्य अस्मिन् मेळने नागसाधवः सामान्यसाधवश्च अधिकतया भागस्वामिनः भवन्ति। (पर्णशालाः) तात्कालिकवासस्थानानि निर्मीय भ्रमन्तः ते महद्यात्रोत्सवं स्मारयन्ति। ग्रमेभ्यः पत्तणेभ्यः निर्धनधनिकभेदेन विना आगतजनैः निर्वाह्यमाना पर्वसमा यात्रेयम्।कुम्भ इत्यस्य कुण्डः इत्यर्थः। द्वादशवर्षानन्तरमेकवारं ग्रहगतीः अनुसृत्य नदीनां यथा पुष्कराणि निर्वाह्यन्ते तथैव कुम्भमेळनान्यपि अपि ग्रहगतीरनुसृत्यैव निर्वाह्यन्ते।

चिरञ्जीवत्वमहाशक्तिं प्राप्तुं अमृताय क्षीरसागरमन्थनाय देवाः राक्षसाश्च मन्दरपर्वतं मन्थनं कृत्वा वासुकिं रज्जुं कृत्वा क्षीरसागरमन्थनमारेभिरे। अन्ते सर्वप्रयत्नफलात् अमृतं लब्धम्। तदा द्वयोर्मध्ये विवादः प्रारब्धः। तदा महाविष्णौ अमृतकलशं  स्वीकृत्य वियन्मर्गिद्वार गच्छति सति हरिद्वार उज्जयिनी - नासिक् प्रयाग नदीषु अमृतबिन्दवः केचित्पतिताः। तस्मात्कालादारभ्य कुम्भमेळनं नाम्ना अत्र यात्रोत्सवाः प्रवर्तन्ते इति सूर्यबृहरुपतिग्रहस्थानाधारतया कुम्भमेळनोत्सवाः प्रवर्तन्ते। बृहस्पतिसूर्यो सिंहराशिस्थौचेत् कुम्भमेळनं नासिक स्थत्रयम्बकेश्वरे, सूर्ये मेषराशिस्थे हरिद्वारप्रदेशे बृहस्पत्या वृषभराशौ सूर्येण मकरराशौ स्थिते सति प्रयागे बृहस्पतिसूर्यो वृश्चिकराशौ स्थितयोः, उज्जयिन्यां कुम्भमेळनं निर्वाह्यते।

प्रायशः कुम्भमेळनं वर्षचतुष्टयानन्तरमेकवारं, षड्वर्षानन्तरमधकुम्भमेळा, हरिद्वारुप्रयागक्षेत्रे च प्रवर्तते। पूर्णकुम्भमेळा द्वादशवर्षानन्तरं प्रयागा, हरिद्वार उज्जयिनी, नासिक् प्रदेशेषु प्रवर्तते।कुम्भमेळने मा किं प्रष्टिकोटिजनाः पुण्यस्नानमाचरितवन्तः इति वदन्ति। अत्र पितृदेवेभ्यः तर्पण समर्पणात् पितरः पुण्यलोकं प्राप्नुवन्तीति विश्वासः। महाकुम्भमेळनसमये ति.ति.देवस्थानालयनिर्वाहकैः प्रयागराज्स्थले प्रधानालय प्रतिमा रूप -उत्सवविग्रहाः संस्थापिताः। तदा श्रीवेङ्कटेश्वरस्वामिने नित्यार्चनानि कल्याणोत्सवाश्च वैभवोपेतया निर्वाहिताः। एतान् उत्सवान् यस्.वि.बि.सि. मार्गद्वारा भक्तैः द्रष्टुं समुचितावकाशं कल्पयामासुः। महाकुम्भमेळने बहुदूरागतभक्ताः पुण्य स्नानानि कृत्वा कलियुगप्रत्यक्ष दैवस्य श्रीवेङ्कटेश्वरस्वामि दर्शनं प्राप्य पुनीताः अभवमिति आनन्दानुभूतिं लेभिरे। कुम्भमेळनं, अर्धकुम्भमेळनं पूर्णकुम्भमेळनं - महाकुम्भमेळने केन्द्रप्रभुत्वेन यात्रिकानां सौकर्यार्थं प्रयाणवैद्यादिसाहाय्यं सम्यक् दत्तम्। भक्तेभ्य यःकोऽपि क्लेशः माभदिति अत्युत्तमचर्याश्च सम्यक् कल्पिताः।

**उत्तरप्रदेशस्थप्रयागराज् पुण्यस्थले 2025 महाकुम्भमेलनपर्वदिन सन्दर्भे 2025 जनवरि 8 तिथौ तिरुपतिपुण्यपट्टणात् प्रस्थित श्रीवेङ्कटेश्वरस्वामिनः कल्याणरथस्य शुभ पताकां चालयन् कृतप्रारम्भः ति.ति.देवस्थान धर्मकर्तृमण्डल्यध्यक्षाः श्री बि.आर्. नायुडुमहोदयाः, ति.ति.दे. अनुबन्धकार्यनिर्वहणाधिकारिणः, श्री वेङ्कय्यचौदरि ऐ.ए.यस्., महोदयाः, एवं तत्र 2025 जनवरि 12 तिथौ ति.ति.देवस्थान पक्षतः निर्मिततिरुमल श्रीवेङ्कटेश्वरस्वामिप्रतिरूपार्चामूर्त्यालये वैभवोपेततया प्रवर्तितकार्यक्रमाणां मनोहरदृश्यम्।**































महाकुम्भमेलनपर्वदिन सन्दर्भे उत्तरप्रदेशस्य प्रयागराज् पुण्यक्षेत्रस्थले प्रवर्तित ति.ति.देवस्थान श्रीवेङ्कटेश्वरस्वामिप्रतिरूपार्चामूर्त्यालये 2025 फिब्रवरि तृतीयतिथौ वसन्तपञ्चमीसन्दर्भे सरस्वत्यलङ्कारे देदीप्यमानतया प्रकाशमानाः श्रीवेङ्कटेश्वरस्वामिनः। एवं प्रयागराज्पुण्यक्षेत्रस्थ दशाश्वमेधघाट्गङ्गनदीप्राङ्गणे 2025 जनवरि 16 तिथौ श्रीदेवी भूदेवी समेत श्रीनिवासस्वामिनः वैभवोपेततया प्रवर्तितस्नपनतिरुमञ्जनकार्यक्रमवैभवम् अपि च चक्रस्नान वैभवमनोहर दृश्यम्।



कुम्भमेलनपर्वदिनसन्दर्भे 2025
जनवरि 18 तिथौ प्रयागराज्पुण्यक्षेत्रे
तिरुमल
श्रीवेङ्कटेश्वरस्वामिप्रतिरूपार्चामूर्त्यालये
वैभवोपेततया निर्वाहित
श्रीनिवासकल्याणोत्सव मनोहर
दृश्यानि।



(दशमपुटात्)

कथानायकः भगवानेव रघुवंशे कौसल्यादशरथपुण्यफलात् अवततार।

**परित्राणाय साधूनां विनाशाय च्चदुष्कृतां।**
**धर्मसंस्थापनार्थाय सम्भवामि युगे युगे ॥**

इति गीताकारवचनमनुसृत्य भगवदवतारोऽपि लोकायादर्शप्रायः श्रीरामः महापुरुष इव स्वलीलाः प्रदर्शयामास। रामकथा स्मरणात् पठनात् हृदये पवित्रभावाः सर्वेषां उत्पद्यन्ते। सद्गुणनिधेः तस्य पवित्रचर्याः सर्वदा सर्वैराचरणीयाः। एकपत्नीव्रतनियमः, भ्रातृप्रेम, मित्रानुरागः शरणागतवात्सल्यं प्रजानुरागः, इत्येतेगुणाः तस्य सहजाः। पित्राज्ञामनुसृत्य मातुराशीर्वादं स्वीकृत्य यागसंरक्षणार्थं विश्वामित्रमनुसृत्य गत्वा ताटकादिसहस्राधिकराक्षसान् जघान। मातरं सात्वयित्वा पितुराज्ञामुल्लङ्घयितुमहमशक्तः कैंकयीमुद्दिश्य नाहमर्थपरोदेवी। विद्धिमां ऋषिभिस्तुल्यं केवलं धर्ममास्थितमित्युवाच। भरतमुद्दिश्य पितुराज्ञानसारं राज्यभिषिक्तो भव सत्यसन्धोभव इत्युवाच। भरतलक्ष्मणशत्रुघ्नेषु अपारभ्रतृप्रेमयुक्तोऽयं भारतार्थं प्राणानपि परित्यजेयमित्युवाच।

**यश्चरामं न पश्चेत्तु यश्चरामोन पश्यति।**
**निन्दितः स भवेल्लोके स्वात्माप्येनं विगर्हति॥**

इति लक्ष्मणवचनं भातृभक्तेः पराकाष्ठा भवति। ईश्वरः पार्वती मुद्दिश्य रामनाममहत्त्वमुद्दिश्य "श्रीराम राम रामेति रमे रामे मनोरमे। सहस्रनामतत्तुल्यं रामनाम वरानने।" इत्युवाच। अत एव भारते सर्वत्र हैन्दवाः श्रीरामनवमीजन्मदिनं श्रीरामपट्टभिषेकञ्च महद्भक्त्या महानन्देन निर्वहन्ति। रामालायाः ग्रामे ग्रामे सर्वेषु पट्टणेषु, हनुमदालयाश्च नित्यपूजाभिः विराजन्ते।

यावत्स्थास्यन्ति गिरयः सरितश्च महीतले।
तावद्रामायणकथा लोकेषु प्रचलिष्यति। इति श्लोकवचनं सर्वधा सत्यमेव।

**रामो विग्रहवान् धर्मः साधुः सत्यपराक्रमः।**
**राजा सर्वस्य लोकस्य देवानामिव वासवः॥**

भारतसर्वकारोऽपि कोटिशः धनं व्ययीकृत्य अयोध्यायां सुविशालप्रदेशे श्रीरामालयं निर्मीर्य सर्वदा सर्वभक्ताकर्षाकतया नित्यपूजाः कल्याणोत्सवादिभिः महता वैभवेन निर्वाहतीत्ययं विषयः महानन्ददायकः।

वाल्मीकिना पृष्टः नारदः अवतारपुरुषस्य श्रीरामस्य गुणगणान् चतुर्दशश्लोकेषु बालकाण्डे एवं विवृणोति। श्रीरामनवमी सन्दर्भे श्रीरामस्य गुणवर्णनं पाठकैः स्मरणीयमिति प्रदर्श्यते -

१.इक्ष्वाकुवंश प्रभवो रामो नाम जनैश्श्रुतः नियतत्मा
महावीर्यो द्युतिमान्धृतिमान् वशी।
२.बुद्धिमान् नीतिमान् वाग्मी श्रीमान् शत्रुनिबर्हणः विपुलांसो
महाबाहुः कम्बुग्रीवो महाहनुः।
३. महोरस्को महोष्वसो गूढजत्रुरन्दिमः।
आजानुबाहुस्सुशिराः सुल्लाटः सविक्रमः॥
४. समः समविभक्ताङ्गः स्निग्धवर्णः प्रतापवान्।
पीनवक्षाः विशालाक्षो लक्ष्मीवान् शुभलक्षणः।
५. धर्मज्ञः सत्यसन्धश्च प्रजानाञ्चहिते रतः।
यशस्वी ज्ञान सम्पन्नः शुचिर्वश्य समाधिमान् ।
६.प्रजापतिसमः श्रीमान् धातारिपुनिषूदनः।
रक्षिता जीवलोकस्य धर्मस्य परिरक्षिता॥
७. रक्षिता स्वस्य धर्मस्य स्वजनस्य च रक्षिता।
वेदवेदाङ्गतत्त्वज्ञो धनुर्वेदे च निष्ठितः॥
८.सर्वशास्त्रार्थ तत्त्वज्ञः स्मृतिमान् प्रतिभानवान्।
सर्वलोकप्रियस्साधुः अदीनात्मा विचक्षणः॥
९. सर्वदाभिगतः सद्भिः समुद्र इव सिन्धुभिः।
आर्यः सर्वसमश्चैव सदैव प्रियदर्शनः॥
१०. स च सर्वगुणोपेतो कौसल्यानन्दवर्धनः।
समुद्र इव गाम्भीर्ये धैर्येण हिमवानिव॥
११. विष्णुना सदृशो वीर्येसोमवत् प्रियदर्शनः।
कालाग्निसदृशः क्रोधे क्षमया पृथिवीसमः॥
१२.धनदेन समस्त्यागे सत्ये धर्म इवापरः।
१३. तमेवं गुणसम्पन्नं रामं सत्यपराक्रमम्।
ज्येष्ठं श्रेष्टगुणैर्युक्तं प्रियं दशरथस्सुतम्॥
१४. प्रकृतीनां हितैर्युक्तं प्रकृतिप्रियकाम्यया।
यौवराज्येन संयोक्तुं ऐच्छत् प्रीत्या महीपतिः॥

# भृगुमहर्षिः

- आचार्य जि.पद्मनाभम्,
चरवाणी -९२४७३२८२८६



विखनसमहर्षिशिष्येषु प्रथमत्वेन ख्यातिं सम्पाद्य आराधनशास्त्र कर्ता महनीयः भृगुमहर्षिः वैशाखमासे रोहिणी नक्षत्रे जनिं लेभे। अतः तस्मिन्  दिने कालनिर्णयपट्टिकामनुसृत्य २०२५ संवत्सरे एप्रिल् मासे ३० तिथौ अस्य तिरुनक्षत्रं निर्वहन्ति। ब्रह्मणः हृदयात् जातः परमपूज्यः नवब्रह्मसु एकः भृगुमहर्षिः। च्यवनजमदग्नि शुक्रदधीच्यादिमहर्षिवर्याणां स्ववंशे मूलपुरुषः। अस्मिन् वंशे विष्णुमूर्तिरिव परशुरामत्वेन जातः भृगुरामः इति ख्यातिमवाप।

**भृगमहर्षिसन्ततिः -** भृगुः कर्दमप्रजापतिनयां ख्यातिं परिणीय तत्सेवया सन्तुष्टः धाता विधाता इति पुत्र द्वयं श्रीरिति भगवत्परायणां पुत्रीं ख्यातिद्वारा प्रप्तः एतेषां जनकः बबूव। ततः उशनां परिणीय उशनसं पुत्रमवाप। अयं उशनाः एव राक्षसगुरुः शुक्राचार्यः। ततः पुलोमेति कन्यकामणिं परिणीय तद्वाराजातच्यवनमहर्षेः पिता बभूव। एवं भृगुः त्रिस्रः कन्याः परिणीय वंशाभिवृद्धिञ्चकार।

भृगुमहर्षिद्वारा अग्निगृहसंरक्षणेनियुक्ता भर्तरि स्नानार्थं गते, अग्निं प्रज्वालन्त्यासीत्। तदा पुलोमनामकराक्षसः मोहपरवशः अग्निगृहं गत्वा इयं पुलोमा वा न वेति अग्निहोत्रं अपृच्छत्। अग्निदेवः असत्यदोषात्भीतः सैव पुलोमेति सत्यमुवाच।ततः पुलोमः सूकररूपे तां नयतिस्म। तदा पुलोमागर्भच्युतः च्यवनमहर्षिः तं राक्षसं भस्मीपटलञ्चकार। भृगुमहर्ष्यागमनानन्तरं सर्वं वृत्तान्तं पन्त्या पुलोमद्वारा श्रुत्वा भृगुः कुपितः सर्वभक्षो भवेति अग्निंशशाप। असत्यदोषभीतः सत्यमुक्तोऽस्मीति मदपराधं क्षमस्वेति शापमुपसंहरेति प्रार्थितोऽपि भृगुः शापमुपसंहर्तुं नाङ्गीचकार। तदा अग्निः स्वदाहाग्निरूपमेव उपसंहारञ्चकार। तदा ब्रह्मादयः आगत्यभृगुमहर्षिकोपं सान्त्वयित्वा अग्निं त्वं सर्वभक्षकोऽपि सर्वपूज्यः पावकः लोके भविष्यतीति अग्नेः वरं ददुः।

**विष्णुमूर्तेः भृगुमहर्षिशापः -** दैवशक्तिसम्पन्नैः दैवैः पीडिताः राक्षसाः गुरु शुक्राचार्यं शरणं ययाचिरे। सः मृतान् राक्षसान् पुनरुज्जीवयितुं कैलासं गत्वा शिवानुग्रहार्थं मृतसंजीवनीवरप्रात्यर्थं तपश्चकार। शुक्राचार्ये तपोनिमग्ने सति पुनः देवपीडिताः राक्षसाः आत्मरक्षणार्थं भृगुपत्नीं रक्षणार्थं शरणं प्रापुः। उशना तेषां राक्षसानां अभयं दत्वा इन्द्रादिदेवान् स्तम्भीभूताञ्चकार। तदा देवाः विष्णुं शरणं प्राप्य राक्षसेभ्यः भृगुपत्नीकटाक्षं आत्मभ्यं राक्षसबाधां निवेदयामासुः। विष्णुः इन्द्रादिदेवतादुःस्थितिं ज्ञात्वा

उशनां हन्तुं समर्थोऽपि स्त्रीहत्यादोषशङ्कितः केवलं तामुशनां भीतावहाश्चकार। तदा सा ससेन्द्रः विष्णुः भस्मीभवतु इति शापप्रयोगसंकल्पोद्युक्ता आसीत्। झटिति विष्णुः सर्वान्तर्यामी तत्प्रयोगं विज्ञाय निशितबाणंप्रयुज्य तत्कण्ठच्छेदश्चकार। राक्षसैः ज्ञातः भृगुः मृतभार्यासकाशमागत्य कोपोन्द्रिक्तः विष्णुमुद्दिश्य त्रिभुवनाधीशत्वेन दुष्टशिक्षणशिष्टरक्षणमेव कर्तव्यम्। तथापि धर्मं विस्मृत्य स्त्रीहत्यां कृतोऽसि। एतत्फलतया भूलोके मानवो भूत्वा जननमरण सुखदुःखभाक् भवेति शशाप। शापोपसंहारं कर्तुं शक्तोऽपि विष्णुः भृगोः शापदानशक्तिः मयैव दत्तेति तद्व्यर्था माभूदिति भृगुमहर्षिमेव शरणमवाप। तदा भृगुः विष्णुं सम्बुद्ध्य '' महात्मन् त्रिलोकाधिपतिं त्वां नाहं शप्तुं समर्थः। त्वमेव भूमौ दुष्टशिक्षणशिष्टरक्षणार्थं अवतर्तुं मद्वारा शापवाचमानीतोऽसि। अहं निमित्तमात्रः इति भूलोके त्वदवतारेभ्यः धर्मरक्षणाधर्मविनाशः भवत्विति मन्त्रजलं विष्णौ संप्रोक्ष्य निजतपोबलात् भार्यां उशनां पुनरुज्जीवयित्वा स्वस्थानं जगाम। इन्द्रादिदेवाः भृगुमहर्षि माहात्म्यं दृष्ट्वा साश्चर्याः स्वावासं जग्मुः। एवं विष्णुमूर्तिः भृगुशापग्रस्तः बभूव।

**भृगुमहर्षिणा ऋषिनियोगात् त्रिमूर्तीणां औन्नत्यपरिशोधनम्** :-सरस्वतीनदीतीरे विद्यमना महर्षयः त्रिमूर्तिषु कस्य माहात्म्यमधिकमिति निर्धार्य अस्माकं वक्तव्यमिति तद्वारा तमेव महिमोपेतमुपास्य मुक्तिं प्राप्स्यामः इति भृगुं पप्रच्छुः। भृगुः तदभीष्टं पूरयितुमङ्गीकृत्य साहसोपेतः वाङ्मनोऽगोचर जीवसृष्टिकर्तृतपःफलप्रदातृविश्वकर्तृमहर्षिचन्द्रादित्य, ग्रहनक्षत्रगणदेवगण वसुरुद्रसिद्धसाध्यविश्वकर्मविश्वेदेवता, -पितृदेवतापरिवेष्ठितः ब्रह्मसभां प्रविश्य तत्सत्त्वगुणातिशयं ज्ञातुं नुतिवन्दनकार्यरहितः आसीत्। ब्रह्मा ''मां न स्तौतीति कोपोद्रिक्तः आसीत्। ततः ब्रह्माणं शान्तोदकेन दूरीकृत्य पश्चात् भृगुः रजतपर्वतस्थपार्वतीसहितं विश्रान्तं शिवं तुष्टाव। भातृवत्सलः शिवः सानन्दं स्वागतमुक्त्वा सन्मानयामास। भृगुः तस्य सत्वगुणं ज्ञातुं प्रत्युत्तरमदत्वा तूष्णीं बभूव। एतदवमानमिवमत्वा शिवः शूलेन मुनिं शिक्षितुं प्रायतत। झटिति पार्वती भृगौ त्रिशूलपातं निवार्य भर्तुकोपोपशमं चकार। पश्चात् भृगुः रजतशैलात्प्रति निवृत्तः। ततस्सः भृगुः वैकुण्ठं गत्वा कमलाङ्कपर्यङ्कगतं सुखावस्थायां विद्यमानं कौस्तुभाभरणवक्षस्थलं विष्णुं स्वपादाहतश्चकार। तदा विष्णुः शय्यातः उत्थाय भृगुपादसकाशं गत्वा भृगुं संबुद्ध्य परमतपोधन। त्वदागमनमज्ञात्वा लक्ष्म्या सह विद्यमानं मां क्षमस्व त्वत्पादाहतिः मां, सकलभुवनानि च पवित्रीकरिष्यति त्वपादाहतिः ममवक्षःस्थलभूषणमेवेति, त्वदागमनेन धन्योहमिति, दयया अनुगृह्य षोडशोपचारपूजां कर्तुं रत्नसिहासनमधिष्ठीयतामिति बहुविधमधुरालपैः भृगं सात्त्वयामास। तदा विष्णुप्रार्थनया परमानन्दोपेतः भृगुः विष्णुमभिनन्द्य विष्णुभक्तिपारवश्येन परमशान्तोभूत्वा तमामन्त्र्य सरस्वती तीरं गत्वा त्रिमूर्तिदर्शनपरीक्षाफलसमाचारं ऋषिभ्यः विशदीचकार। तदा ऋषयः छिन्नसंशयाः श्रीसतीशः एव आदिमध्यान्तरहितः सर्वपूज्यः इति तदादि विष्णुमेव विज्ञानकलितः इति आराधयन्ति स्म।

**भृगुमहर्षेः यवनाश्वे अनुग्रहः -** इक्ष्वाकुवंशजः युवनाश्वः सहस्राश्वमेधयागविधाता महाप्रतिष्ठावान् अपुत्रः तदर्थं भृगुं प्राप्य अनेकवर्षपर्यन्तं तमुपास्य तदनुग्रहात् पुत्रकामेष्ठियागं कृत्वा यागात् मन्त्रपूतजलकलशं प्राप्य तद्रक्षणार्थं ऋत्विजान् नियुयोज। निद्रावशेषु ऋत्विक्षु युवनाश्वः दाहात्तिपीडितः कलशजलं पपौ। एतद्ज्ञात्वाभृगुः युवनाश्वं एवमवोचत्। हे राजन् भार्यार्थं देयंजलं त्वमेव पीतोऽसि। दैवगत्या त्वं इन्द्रसमं पुत्रं महामहं प्राप्यसीत्युक्त्वा अन्तर्हितः। भृगुमहर्षिकटाक्षानुग्रहात् युवनाश्वशरीरे शतवर्षानन्तरे वामभागं विदीर्य बालार्कतेजाः बालः आविर्भूय षट्चक्रवर्तिषु प्रसिद्धः मान्धातृचक्रवर्ती बभूव।

**भृगुविद्याधरसमागतमः -** कदाचित् विन्ध्यपर्वतप्रान्ते क्षामावृते सति बलिहव्यकव्यान्नफलाभावात् भृगुः कैलासं गत्वा शिष्यगणैः तपः आचरति स्म। तदा शार्दूलमुखः पुरुषः स्वशरीरपार्श्वभागे स्त्रीरूपः भृगुदृष्टिपथंगतः। भृगुना कारणं पृष्टः स्वर्लोकादागमनकाले मन्मुखमेवाज्ञातमिति तत्परिहारार्थं

भृगुं प्रार्थयामास। भृगुः त्वं कृतयुगे एकादश्यां उपवासनियमं पालयित्वा द्वादशीदिने तैलाभ्यङ्गनं कृतोऽसि। एतत्फलतया त्वद्रूपमेवं जातमिति, माघस्नानात् विकृतरूपं नंक्ष्यति इत्यवोचत्। विद्याधरः तथैव माघमासस्नानमाचर्य विकृतरूपाद्विमुक्तः सभार्यः स्वर्लोकञ्जगाम।

**जमदग्निपरशुरामयोः भृगुनामहोपकृतिः -** भृगुमहर्षिः कैलासे तपः कुर्वन् त्रिकालवेदी अभूत्। कार्तवीर्याजुनयुद्धे जमदग्नौ मृते रेणुकासहगमनं निरुद्ध्य भृगुः जमदग्निं पुररुज्जीवयामास। अन्यस्मित्काले स्वदर्शनागतं स्ववंशदीपकं परशुराममादृत्य तपः आचरणाय सूचयामास। अनतिकाले तपोमाहात्म्यात् परशुरामस्य दिव्यतेजस्संक्रमणात् भृगुमहर्षिशिष्याः अन्धीभूताः आसन्। तदा भृगुः परशुराममुद्दिश्य त्वं कैलासे शिवमाराधय। उभयोः शुभं भविष्यतीति तं कैलासं प्रेषयामासः। परशुरामः शिवमाराध्य शिवतेजः, भार्गवास्त्रञ्च शिवादवाप। एवं भृगुः निजवंशोद्भवानां उपचकार।

**भृगुना भरद्वाजाय ज्ञानोपदेशः -** कदाचित् कैलासस्थभृगुमहर्षिसकाशं भरद्वाजमहर्षिः गत्वा आतिथ्यं प्राप्य जिज्ञासया बह्वाध्यात्मिकविषयान् पप्रच्छ। अदौ भूतसृष्टिप्रकारं भृगुरेवं विशदीचकार। अव्ययानन्तनारायणः भूतसृष्ट्यर्थं स्वसहस्रांशे अव्यक्तमनसः अजरामरं अनुपमं ससर्ज। तस्मात् महत्तत्वं प्रादुर्बभूव। महत्तत्त्वेन दिव्यतेजोमयपद्माविर्भावात् तस्मात् ब्रह्मा अजायत। तत्सङ्कल्पात् आकाश जलाग्निमरुद्भूमयः जाताः। अखिलात्मा सः ब्रह्मा विष्णुरेव। एवं विश्वमेव विष्णोराजयत। पश्चात् भरद्वाजः आकाशादिभूतपरिणामं अपृच्छात्। तदा भृगुः भूताः अनन्ताः, निरवधिकाः अप्रमेयाः। अत एव विष्णोः अनन्तनामानि जातानीत्यवोचत्। पश्चात् भरद्वाजः पुष्करं ब्रह्मणः आदिनिवासस्थानमितिविषयं, भूतानां पञ्चत्वकारणं, स्थावरेभ्यः भूतगुणजननविधानपपृच्छत्। पश्चात् भरद्वाजः भूतगुणाः कथमनुभवयोग्याः इत्यपृच्छत्। एतेत्समाधानतया भृगुः एवमुवाच। - वत्स! विषयः इन्दियाणि मनः, क्रमस्थात्वेन अन्तरात्म प्रदर्शनं भूत्वा अनुभूय सुखदुखे पुरुषः प्राप्नोतीत्यवोचत्। पश्चत् वर्णाश्रमक्रमं उक्त्वा सत्यमेव तपः ब्रह्मा, सच्छक्तिः इति सत्यमसत्येन विहितमिति प्रोवाच। अतः धर्माधर्मज्ञानाज्ञानानि, स्वर्गनरकौ, सुखदुःखे इत्यादिव्यावहारिकशब्दानां सत्यासत्ये एव अर्थीभूत्वा प्रवर्तते। अतः असत्यविनाशायैव बुधाः नियमनिष्ठाप्रवर्तकाः सन्ति। तस्मात् शारीरकमानसिकदुःखानि दूरी भवन्ति। दुःखदूराज्ञातसौख्यान्यपि नाशयित्वा प्राप्तवैराग्यः पुरुषः परमपदं प्राप्नोतीत्यवोचत्। ततः भरद्वाजेन इहपरभेदमधिकृत्य पृष्टः भृगुरेवमुवाच - : वत्स! अयं लोकः कर्मभूमिः, भोगास्पदः, दुःखबहुलः। आलोकस्थ भूरिसुखनिरतत्वात् द्वयोः वासगृहशयनवसनासनगन्धमाल्यजननादिसुखसाधनेषु हस्तिमशकान्तरं वर्तते। परन्तु ममकारवर्जिता पुण्यपापमार्गविमुक्ताः जननमरणलोके अपतित्वा शाश्वातानन्दानुभवं प्राप्नुवन्ति। बह्वविहितधर्मसूक्ष्माः अनेके इति विशदीकृत्य भरद्वाजं भृगुः प्रेषयामास।

**भृगुसूत्राणि -** ज्योतिश्शास्त्रसारः, भृगुसूत्राणीति भृगुना विचितानि सुप्रसिद्धानि। तत्र प्रथमाध्याये रविफलं द्वितीयाध्याये चन्द्रफलं तृतीयाध्याये कुजफलं चतुर्थाध्याये बुधफलं, पञ्चमाध्याये गुरुफलं षष्ठाध्याये शुक्रफलं सप्तमाध्याये शनिफलं अष्टमाध्याये राहुकेतुफलानि प्रोक्तानि। अन्ते ग्रहोच्चनीचभावाः ग्रहजातिभेदाः निरूपिताः।

**भृगुस्मृतिः -** भृगुः धर्मशास्त्रप्रवक्तेति कात्यायनेन प्रोक्तम्। जात्या विद्यया वा महात्मापि आततायी चेत् तस्य हत्यया ब्रह्महत्यापातकफलभाक् नभवेदिति, साक्षिभिः साहसैःन्यायस्थानेषु विजेताऽपि दिव्यदृष्ठ्या दोषादोषौ निर्णयावित्यादि धर्मसूक्ष्मांशाः भृगुस्मृतौ वर्तन्ते इति कात्यायन वचनम्। एवं ब्रह्ममानसपुत्रः भृगुः सद्वंशमूलपुरुषः निजतपसा अनवद्यः ब्रह्मत्वं प्रात्य परब्रह्मणि विलीनः आसीत्। एतन्महर्षिपवित्रनामामृतेन मानवपापाग्नयः क्षणे शान्ताः भवेयुरिति निर्विवादांशः।



# परोपकारार्थमिदं शरीरम् निष्कलङ्कभक्त्या मुक्तिः

- डा एम्.ईश्वरम्मा
चरवाणी - ८१०६५७८२५०

पुरा काञ्चीपुरे चिरुतोण्डनम्बिनामकः वैश्यकुलशेखरः आसीत्। अखण्डशिवभक्तितत्परेऽयं पत्न्या तिरुवेङ्गनांच्या नित्यं जङ्गमाराधनपत्परः कालं यापयतिस्म। एतयोः सिरियाळः इति मातृपितृभक्तितत्परः पुत्रः आसीत्। चिरतोण्डनम्बिः पूर्वजन्मवासना विशेषात् एकाम्रनाथमाराधयन् जङ्गमप्रमथेभ्यः धनमनोवञ्चनया विना याचककल्पवृक्षः सदा अन्नदानमाचरतिस्म। कदाचित् पार्वतीपरमेश्वरौ चिरतोण्डनम्बि भक्ति तत्परतां परीक्षितुमैच्छताम्। इन्द्रमाह्वयित्वा काञ्चीपुरेनिरवधानतया वर्षं वर्षितुमाज्ञपयामासतुः। अकस्मात् कुम्भवर्षः प्रारब्धः। चिरुतोण्डम्बिः पचनेन्धनाभावात् स्वगृहस्थानन्तवस्त्राण्येन तैले आर्दीकृत्य दाहयित्वा खाद्यपदार्यान् पाचयित्वा शिवभक्तेभ्यः अन्नदानमाचरति स्म। विंशत्येकदिनपर्यन्तं अकुण्ठितवर्षपातात् जलोपद्रवभीताः प्रमुखजङ्गमयोगिनस्सर्वे काञ्चीनगरं विहाय कुत्रचिद्यथेच्छं जग्मुः।

एकस्मिन् दिने रुद्राक्षमालाधारी कश्चित् वृद्धः स्वं सेव्यमानया वृद्धमहिलया दृष्टः। दानशीलस्य चिरुतोण्डनम्बेः तस्य एकोऽपि शिवभक्तः न दृष्टः। काञ्चीपुरं सर्वं भ्रमित्वा अन्ते ग्राम बहिःस्थ शिथिलदेवालयं प्राविशत्। तत्र गर्भमण्टपे त्रिपुंड्रालङ्कृतं आत्मानं चरितार्थं कर्तुमयाचत।

परमवृद्धः सः ऊर्ध्वमुखः शिवकारुण्यमिति आशीर्दत्वा एनमपृच्छत् तव वंशः कः, नाम किं, विवाहितश्चेत् सन्ततिरस्ति वा? अहं सप्तदिनेभ्यः निराहारव्रतमाचरामि। व्रतोद्यापनाय पशूपहारः आवश्यकः। तत्रापि यागपशुः नरः एव ब्राह्मण क्षत्रिय वैश्येष्ववश्यं यः कोप्येकः भवितव्यः। सोऽपि सुन्दरः बालः रोगहीनः भवितव्यः। पितरौ एव एतादृशं पुत्रं पचनपदार्थत्वेन पचनीकृत्य तद्भोजनं आवाभ्यां सह भोक्तव्यमित्यवोचताम्। चिरुतोण्डनम्बि स्वपत्न्याः शिवभक्तिविश्वासं जङ्गमाराधननिष्ठां, पुत्रस्य पित्राज्ञानुल्लङ्घनत्वं मनसि स्मृत्वा भार्यामधिकृत्य सर्वं विषयं प्रोवाच। सापि मन्दहासेन, अस्मच्छरीरप्राणानां कर्तारः शिवयोगीश्वराः एव किल। तच्छरीरधनं तेभ्यः एव समर्पणे अन्या चिन्ता किमर्थमिति प्रोवाच। एतच्छृत्वा चिरुतोण्डनम्बि शिवयोगिसकाशं जगाम। शिवः वेषान्तरे गुरुगृहे नीलकण्ठस्तवं पठन्तं ग्रहेषु चन्द्रतुल्यं सिरियालमपश्यत्। सिरियालः जटाधारिणं दृष्ट्वा साष्टाङ्गनमश्चकार। तदा शिवयोगी सिरियालमुद्दिश्य तव पिता निर्भाग्य शिवयोगिने त्वां आहाररूपेण समर्पयितुं संसिद्धो भवति। त्वं प्राण रक्षणपरो भवेत्यवोचत्। पुत्रः सिरियालः परार्थंशरीरं धनत्यागादन्यत् जीवित सार्थक्यं नास्तीत्यवोचत्। ततः वृद्ध दम्पती पार्वतीपरमेश्वरौ चिरुतोण्डनम्बिना स्नाननान्तरं नूतनवस्त्रादिना सत्कृतौ पार्वती रुपान्तरे तिरुवेङ्गनाञ्चिसकाशं गत्वा तव पिता वृक्षो वा पुरुषो वा कपटोपायशीलाय शिवयोगिने पुत्रं हत्वा आहाररूपेण दातुं संसिद्धः इत्यवोचत्। सा आवयोः प्राणाः शिवाधीनाः शिवः एव कर्ताभोक्ता गच्च गच्छ इति तां बहिः प्रेषतवती। ततः सा पार्वती बहिर्गत्वा अन्तर्धानमभूत्। ततः पाठशालायाः आनीतं पुत्रमङ्केनिधाय पञ्चाक्षरीमन्त्रमेव परब्रह्मार्थसिद्धिप्रदमिति भावय इति पुत्रस्य शिरः चिच्छेद। अधः पतितं शिरः ओं नमश्शिवाय इति जपदासीत्। भोजनं सिद्धमिति चिरुतोण्डनम्बिना प्रोक्ते सति जीवत्पुत्र सन्तानसहितेनैव आवश्यं भोक्तव्यमिति नियमः वर्तते इति कथनात् सिरियालः पुत्रः खेलनार्थं इतः पूर्वमेव गतः इत्यवोचत्। पुत्रागमनाय उच्चैराह्वयतामिति वृद्धशिवदम्पत्या प्रेरिता तिरुवेङ्गनाञ्चिः उच्चैः प्राणप्रद! कुमार। आगच्छ इत्याह्वयायमास। पुत्रः सिरियालः शाकपाकेभ्यः तत्पुरतः प्रत्यक्षीभूतः झटिति निजरूपं धृत्वा पार्वतीपरमेश्वरौ सशरीरं कैलासमागच्छेति चिरतोण्डनम्बि पृष्टः अत्रस्थैः सहरुवैश्यगोत्रैरेव त्रेलासममागमिष्यमीत्यवोचत्। शिवः त्वं भार्या पुत्राभ्यां सहस्रैः वैश्यैः सहापि केलास मागन्तुमनुमति ददौ। ततः चिरुतोण्डम्बि कुटुम्बेन सह सहस्राधिकवैश्यः कैलासंगताः। एवं भक्तः चिरुतोण्डनम्बि परोपकारार्थपरायणः शिवभक्त्या पुत्रहननत्यागः जगत्प्रसिद्धः बभूव।

# सुगुणभिरामः रामः

तेलुगु मूलम् - श्री के.वेङ्कटाप्पल्लाचार्युलु
चित्राणि - श्री के.वि.कोटिलिङ्गाचार्य
संस्कृतानुवादः - डा.सूर्यनारायणरेड्डि
चरवाणी - ८१०६५७८२५०

बालकेभ्यः रामायणे श्रीरामस्य गुणगणप्रदर्शकदृश्यमालिका।



दक्षरथपुत्राः रामलक्ष्मणभरतशतृघ्नाः सोदरानुरागस्य प्रतीकाः।



श्रीरामसदृशः शिष्यः विश्वामित्रसदृशः गुरुः मानवसृष्टावैव न स्तः एतौ गुरुशिष्यसम्बन्धस्य पताकास्थानम्।



सर्वधा पितृवाक्यपालकः श्रीरामः स्वभार्यया सीतया सोदरेण लक्ष्मणेन सह चतुर्दश वषपर्यन्तं वनवासाय जगाम।



महर्षीणां आज्ञाः शिरोधार्य श्रीरामः राक्षसेभ्यः महर्षीन् रक्षित्वा आश्रितवत्सलः बभूव।



भस्मराशिरूपेण विद्यमाना अहल्या रामपादस्पर्शात् शापविमुक्ता बभूव।



रामलक्ष्मणावुभौ अहल्यागौतमयोः आशीः प्रापतुः।



अविद्यया मृत्युं तीर्त्वा विद्यया अमृतमश्नुते।



स्वपितृमित्रस्य जटायोः मरणानन्तरोत्तरक्रियाः निर्वर्तयित्वा मोक्षप्रदः सन् भक्तवत्सलः रामः इति ख्यातिमवाप।



सुग्रीवेण सह मैत्रीं कृत्वा स्नेहधर्मस्य दर्पणमिव सद्गुणराशिराजितः श्रीरामः



हनुमन्तं स्वसेवकं कृत्वा प्रदर्शितपुत्रवात्सल्यः कारुण्यनिधिः श्रीरामः।



विज्ञानवेत्ता श्रीरामः दक्षिणदिक्समुद्रे वारधिं निर्ममे।



दशकण्ठं हत्वा सीतया सह अयोध्यानगरं प्रविश्य पट्टाभिषिक्तः सीतारामः।



सत्यवाक्पालकः एकपत्नीव्रतः एकधर्ममार्गगामी, एकबाणेनैव शतृहन्ता रघुरामः एकादशवर्षसहस्र पर्यन्तं धर्मराज्यं परिपाल्य जगदभिरामः रामराज्यस्थापकः इति जगद्विख्यातिं लेभे।

स्वस्ति



# बालविनोदिनी

प्रदत्तं चित्रपटम् बिन्दुसाहाय्येन पूरयामः वा?

अस्य चित्रपटस्य रञ्जनं कुर्मः वा?









अ. श्रीरामनवमी

आ. क्षीरसागरमन्थने उद्भुत वस्तूनि।

इ. विष्णु

समीचीन समाधान सङ्ख्यां कोशे लिखन्तु।





हनुमान् केन मार्गेण गतश्चेत् सीतासन्निधिं प्राप्स्यति।

मार्ग अण्विषन्तु





उपरि प्रदर्शितेषु पक्षिजन्तुषु रामायणसम्बन्ध रहिताणि कानि।

समाधानानि :- कुक्कुटः, व्याघ्रः



अश्मापि यातिदैवत्वं महद्भिः सुप्रतिष्ठितम्।

Printed by Sri P. Ramaraju, M.A., and Published by Dr. K. Radha Ramana, M.A., M.Phil., Ph.D.,P.G.Dip.in Epigraphy, Dip. in Yoga ,on behalf of Tirumala Tirupati Devasthanams and Printed and Publised at Tirumala Tirupati Devasthanams Press, K.T. Road,Tirupati 517 507. Editor : Dr.V.G. Chokkalingam, M.A., Ph.D.



महाकुम्भमेलन सन्दर्भ पुरस्कृत्य 2025 फिब्रवरि 18 तिथौ वाराणस्यां बेनारस् - हिन्दूविश्वविद्यालये बिर्लामन्दिरे अङ्गरङ्गवैभवोपेततया निर्वाहितश्रीनिवासकल्याणोत्सववेळायां समर्पितपीताम्बराः श्री जे.श्यामला राव्, ऐ.ए.यस्., महोदयाः स्वधर्मपत्न्या सह, तत्सम्बन्धिमनोहर दृश्यम्।



श्रीरामकोटितीर्थमुक्कोटिपर्वदिनसन्दर्भं पुरस्कृत्य प्रवर्तितोत्सवे भागस्वामिनां अशेषभक्त जनानां मनोहरदृश्यम्।



श्रीशैलमहाशिवरात्रि श्रीभ्रमराम्बिकामल्लिकार्जुनस्वामि ब्रह्मोत्सवसन्दर्भे 2025 फिब्रवरि 22 तिथौ तिरुमल श्रीवेङ्कटेश्वरस्वामिपक्षतः धर्मपत्न्यासह समर्पित पीताम्बराः ति.ति.देवस्थानकार्यनिर्वहणाधिकारी श्री जे.श्यामलाराव ऐ.ए.यस्., महोदयाः। तत्सम्बन्धमनोहर दृश्यम्।



महाशिवरात्रिपर्वदिनसन्दर्भे कालहस्तीश्वरस्वामिब्रह्मोत्सवेषु अंशत्वेन तिरुमल श्रीवेङ्कटेश्वरस्वामिपक्षतः 2025 फिब्रवरि 28 तिथौ धर्मपत्न्या सह समर्पितपीताम्बराः ति.ति.दे. कार्यनिर्वहणाधिकारी श्री जे.श्यामलरावु ऐ.ए.यस्., महोदयाः। तत्सम्बन्धिमहनोहर दृश्यम्।



तिरुमलश्रीवेङ्कटेश्वरस्वामिदर्शनार्थं 2025 फब्रवरि मासे 10 तिथौ तिरुमलक्षेत्रं प्रति धर्मपत्न्या सह आगतस्य आन्ध्रप्रदेशराष्ट्रोन्नतन्यायस्थान प्रधानन्यायमूर्तिवर्यस्य श्री जस्टिस् धीरज्सिङ्गठाकूरु महाशयस्य तिरुमलश्रीवेङ्कटेश्वरालयरङ्गनायक मण्टपे स्वामिनां तीर्थं प्रसादान् अपि च चित्रपटं समर्पितानुबन्धकार्यनिर्वहणाधिकारी श्री सि.हेच् वेङ्कय्यचौदरि ए.आर्.यस्.महोदयः।



ति.ति.देवस्थानधर्मकर्तुमण्डल्यां एक्स् अफिसियो सभ्यत्वेन 2025 फिब्रवरि 23 तिथौ कृतप्रमाणस्वीकरस्य आन्ध्रप्रदेशदेवादायकार्यदर्शि श्रीविनयचन्द्रमहोदयस्य धर्मपत्न्यासहितस्य तिरुमल श्रीवेङ्कटेस्वर स्वाम्यलये रङ्गनायकमण्टपे समर्पितचित्र पटतीर्थ प्रसादाः ति.ति.दे. अनुबन्धकार्यनिर्वहणाधिकारिणः श्री सि.हेच्.वेङ्कय्यचौदरि ए.आर्.एस्., महोदयाः।

SAPTHAGIRI (SANSKRIT) SPIRITUAL ILLUSTRATED MONTHLY PUBLISHED BY
TIRUMALA TIRUPATI DEVASTHANAMS PRINTING ON 25-03-2025 & posting at Tirupati
RMS Regd.with the Registrar of Newspapers for India under RNI No.21138/1970 Postal
Regd. No. TRP/154/2024-2026" LICENCED TO POST WITHOUT PREPAYMENT
No.PMGK/RNP/WPP-04(4)/2024-2026" Posting on 5th of every month.



वायल्पाडु
**श्रीपट्टाभिरामस्वामिनः ब्रह्मोत्सवाः**
एप्रिल् 03.04.2025 आरभ्य 11.04.2025 पर्यन्तम्